# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – धर्मशास्त्रम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – धर्मसिन्धुः तृतीयपरिच्छेदः उत्तरार्धः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ स्त्रीणां दाहादिकर्मणि के अधिकारिणः सन्ति ? लिखत।

२ श्राद्धभेदान् यथाग्रन्थं वर्णयत।

३ श्राद्धे ग्राह्य-वर्ज्य–ब्राह्मणानां निरूपणं कुरुत।

४ मरणदिवस-अज्ञाने कर्तव्यकर्मणां निरूपणं कुरुत।

**प्रश्नः २** तीर्थश्राद्धं तथा च तीर्थयात्राविधिं यथाग्रन्थं वर्णयत।

**प्रश्नः ३** श्राद्धपरिभाषां विलिख्य श्राद्धमहत्त्वं प्रतिपादयत।

**प्रश्नः ४** धर्मसिन्धुग्रन्थस्य वैशिष्ट्यं महत्त्वञ्च प्रतिपादयत।

**प्रश्नः ५** धर्मशास्त्रग्रन्थानां जीवने का आवश्यकता ? विषयमिमं समीक्षत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः सविस्तृतमुत्तरं लिखत।**

१ जननाशौचनिर्णयं यथाग्रन्थं वर्णयत।

२ शवस्पर्शादि-संसर्गदोष-प्रायश्चित्तं निदर्शयत।

३ अन्त्येष्टिनिर्णयं यथाग्रन्थं वर्णयत।

४ मरणासन्नः जनः यदि पुण्यसूक्तश्रवणं करोति तस्य किं फलम् ?

**प्रश्नः ७** तीर्थक्षेत्रेषु मुण्डनकरणस्य किं फलम् ? वर्णयत।

**प्रश्नः ८** नित्यतर्पणे कर्तव्यकर्मणां निरूपणं कुरुत।

**प्रश्नः ९** अस्थिसञ्चयनविधिं यथाग्रन्थं वर्णयत ।

**प्रश्नः १०** विधवाधर्माणां सविस्तृतं वर्णनं कुरुत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ जीवन्मातृपितृकेण सूतेन कस्य पिण्डदानं कर्तव्यम् ?
२ कैः पृथक् वैश्वदेवः न कार्यः ?
३ और्ध्वदैहिककर्मणि कः पुत्रः अधिकारी ?
४ जनकपितुः पुत्राद्यभावे कः श्राद्धकर्मणि योग्यः ?
५ ब्रह्मचारिणः मासिकादिश्राद्धं केन कर्तव्यम् ?
६ श्राद्धम् कतिविधम् ?
७ ब्राह्मणभोजनादिकं केन शब्देन व्यवह्रियते ?
८ पार्वणश्राद्धं कतिविधिम् ?
९ उत्तमब्राह्मणाः कति प्रकारकाः ग्रन्थे दर्शिताः ?
१० श्राद्धे कीदृग् प्रकारकाः विप्राः वर्ज्याः ?
११ श्राद्धे के पदार्थाः ग्राह्याः ?
१२ 'सिन्धु' शब्दस्य कोऽर्थः ?
१३ 'धर्म' शब्दस्य कोऽर्थः ?
१४ 'अशौच' शब्दस्य कोऽर्थः ?
१५ 'श्रुति' शब्दस्य कोऽर्थः ?

****